JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

**शोधपत्रसारः**
**Abstract**

# श्रीकृष्णस्य कर्मयोगः – मानवीयांशाः
**Srikrishnasya Karmayogaha Manaveeyamshaha**

डॉ. सि हेच्. पवन् कुमारः, संस्कृते अतिथि अध्यापकः, तेलुगु & प्राच्यभाषाविभाः,
आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरः, गुण्टूरु, आन्ध्रप्रदेशः,

विदितमेवेदं तथ्यं समेषामपि विपश्चितां यद् भवद्गीतेयं प्रस्तवीति कर्मयोगस्य राद्धान्तम् । जीवने कर्मयोगस्य आवश्यकता इत्यत्र सन्ति बहवो वादाः । केचन कर्मणो महत्त्वं स्वीकुर्वन्ति केचन च ज्ञानस्य महत्त्वम् उद्घोषयन्तः कर्म हीनमिति प्रतिपादयन्ति । यदि याथातथ्यतो विविच्यते तर्हि सुकरम् एतद् वक्तुं यद् जीवने कर्म विहाय ज्ञानमपि दुरासदम् । मानवजीवने कर्मैव तारकम्ए साधकम्ए प्रत्यूहवारकम्ए आधिव्याधिविनाशकंए अर्थाधिगमसाधनंए पापनिवारकं चेति ।

अतएव भगवता श्रीकृष्णेन भगवद्गीतायां कर्मयोगे कर्मणः वैशिष्ट्यं सुस्पष्टतया प्रतिपादितम् । कर्मयोगे प्रतिपादितान् मानवीयांशान् यथामति परिशीलनमेय मदीय शोधपत्रस्य मुख्योद्देश्यः ।

**मुख्यांशाः (Keywords)**

(1) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः (2) निष्कामकर्मयोगस्य वैशिष्ट्यम् ।

# श्रीकृष्णस्य कर्मयोगः – मानवीयांशाः
**Srikrishnasya Karmayogaha Manaveeyamshaha**

डॉ. सि हेचू. पवन् कुमारः, संस्कृते अतिथि अध्यापकः, तेलुगु & प्राच्यभाषाविभाः,
आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरः, गुण्टूरु, आन्ध्रप्रदेशः,
चरवाणी - 8008323223, ई- मईल् - pavansimha1981@gmail.com

**"अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः
सर्वभूतदयापुष्पं क्षमापुष्पं विशेषतः ।
ज्ञानपुष्पं तपः पुष्पं शान्तिपुष्पं तथैव च ।
सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत् ।।"**

# आमुखम्

विश्वेऽस्मिन् समस्तप्राणिनः जायन्ते म्रियन्ते च । समस्तप्राणिकोटेः जननं मरणं च स्वाभाविकमेव च । अनन्तकालचक्रगमने तीर्त्वा प्राणिनो मोक्षप्रापप्तिः बहुदुर्लभः । एतादृङ्. मोक्षप्राप्तिः केवल मानवजन्मद्वारेणैव सिध्यति । तस्यापि पूर्वजन्मसुकृतमेव हेतुरिति ज्ञातव्यम् । अत एव

**"मुक्तिर्नो शतकोटिजन्मसुकृतैः पुण्यैर्विना लभ्यते ।"**(1)

इति श्री शङ्करभगवत्पादोक्तिरपि तदेव समर्थयति । उदात्तजन्मप्राप्ता वयं सत्कर्माचरणद्वारेण मोक्षधामं सुलभं प्राप्नुयाम । मोक्ष स्वर्गादपि गरीयसीति सुरैर्बहुधा कीर्तितम् । कर्म - धर्म - ज्ञान - पुण्यभरितायां भारतावन्यां जन्मप्राप्तिः अनेक जन्मपुण्यफलमेवेति निरूपयन् -

**"गायन्ति देवाः किल गीतकानि**
**धन्यास्तु भारत भूमि भागे ।**
**स्वर्गापवर्गास्पदहेतुभूते**
**भवन्ति भूयः पुरुषाः सुरत्वात् ।।"**(2)

श्रीशङ्कराचार्यः स्पष्टयति ।

एतादृङ्गहाद्भुतचरितस्य भारतदेशस्य संस्कृतेः औरसेषु अधिकसंख्याकाः मानवाः (प्रजाः) सत्कर्माचरण भ्रष्टाः, कर्तव्यपालनाविफला भूत्वा भोगारसक्तास्सन्तः, मानवजन्मसाफल्यम् अवाप्नुवन्तः, परमदुःखितमनस्काः सन्तः, हृदयदौर्बल्यपीडितास्सन्तः प्रशान्तदूरास्सन्तः पुनरशान्तेः समीपस्थास्सन्तश्च स्वजीवितानि परमासंतृप्त्यैव यापयन्तः, अन्ते विफलमनोरथा इवैव स्वप्राणान् परित्यजन्ति ।

एतादृग्विषये भगवान् श्रीकृष्णः साक्षात् कर्मयोगी पवित्रगीतामृतगानेन न केवलम् अर्जुनाय, अस्माकं समस्तमानवेभ्यश्चापि दिव्य - भव्य - नित्य - नव्य - सत्कर्माचरणद्वारा आदर्शप्राय इव भूत्वा कर्ममार्गावश्यकतां निर्देशनविधानां लोकाय यथामति ज्ञापनमेव मम प्रधानोद्देश्यः ।

## श्रीकृष्णस्य कर्मयोगः - मानवीयांशाः

'यस्तावत् जीवनयोग आनन्दं नैवान्विष्यन् स्वेन क्रियमाणेषु कर्मसु आनन्दं संतृप्तिं च लभते स एव कर्मयोगी' ।

'शास्त्रविहित सत्कर्माणि निष्कामभावेन समाचरन् स्वकीयं कर्मफलं त्रिकरणशुद्धया यः भगवदायत्तं कुरुते स एव कर्मयोगी'|

श्रीकृष्णः स्वयमेव कर्मयोगी । सः सदा आनन्ददायको भूत्वा तस्य समीपस्थान् सर्वान् आनन्दमयान् विदधाति । स गोपालकवृत्तिं, द्वारकाधिपतिपदम् एवमेव अर्जुनस्य रथसारथ्यंचापि एकरूपतया अकरोत् । न कदापि कर्मफलान्यपेक्षितवान् । अतः लोके श्रीकृष्णसदृशः कर्मयोगी न कोप्यस्तीति वक्तुं नास्त्यत्युक्तिः । एतादृशः महाभागः क्लैब्यभावेन चिन्ताक्रान्तम् अर्जुनम् - कर्तव्यपालनमेव मनुजस्य परमं कर्तव्यम् । कर्तव्यपालनेनैव जीवनसाफल्यसिद्धिलाभश्च । इत्येवमुद्बोध्य कर्मयोगस्य औन्नत्यम् प्रकटितवान् । यथा

**"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।"**(3) इति

अपि च कीदृशं कर्मश्रेयोवहम् ? इति जिज्ञासायाम् ' अनासक्तभावेनैव कार्यकरणम्' - इति गीतायाः परमोपदेशः सन्देशश्च । तदुच्यते -

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ।।"**(4)

यदि याथातथ्यतो विविच्यते तर्हि श्लोकोऽयं यजुर्वेदसम्बन्धी ईशावास्योपनिषदमूलकमेव । उपनिषद्यां प्रोच्यते यत् -

**"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ||"**(5)

अनासक्तिभावनया कृतं कर्म न च बन्धहेतुः, न च दुःखसाधनम् । कर्तव्यबुद्ध्या यद् यद् विधीयते तत् सदा सुखावहमेव । कर्माधीनं जीवनम् । अनासक्तिभावनाया उदयश्च साधीयसीं । गतिं साधयति । अत एव अनासक्ति भावोदये गीतायाः तादृशो दृढनिरोधः । अनासक्तिभावोदये उभयथापि सुखावाप्तिः । उच्यते च -

**"हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।**
**तस्मुदुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।।"**(6)

सुखदुःखे, लाभालाभे समबुद्धित्वमेव योगभावः इति व्यवहियते । तथोच्यते –

**"योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय ।**
**सिद्ध्यसिद्धयोः समो भूत्वा समत्वं योग उच्यते ।।"**(7)

कर्तव्यभावनया अनासक्तेन च यत्कर्मक्रियते तत्कर्मकौशलमिति अभ्युपगम्यते । एतदेव परमयोग इत्युच्यते ।

**"तस्माद्योगाय युज्वस्य योगः कर्मसु कौशलम् ॥"** (8)

प्राकृतिकागुणाः प्रतिक्षणं मानवं कर्मरक्षणार्थं प्रेरयन्ति । एतदेवोच्यते -

**"न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥"**(9)

कर्तव्यस्यकर्मणः अनिवार्यत्वम् उपपादयता उपस्थाप्यते यत् कर्तव्यानुष्ठानम् अन्तरेण लोकयात्राऽपि न प्रवर्तेत ।

**"नियतं करु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥"**(10)

यः कोऽपि अनासक्तः कर्मारभते प्रयतते च, स मोक्षभाक् भवति ।

**"तस्मादसक्तः सततं कार्यं कर्म समाचर ।**
**असक्तोह्याचरन्कर्म परमाप्नोति पूरुषः ॥"**(11)

कर्मणैव यतयो मुनयोऽनासक्तिधियश्च जीवने साफल्यं लेभिरे । जनकः - भरतः सुग्रीवः - हनुमदादयः स्वकीयं कर्तव्यं फलोपेक्षरहिततया संसाध्य मोक्षार्हाः अभवन् । अतः जनहित साधनायापि कर्मणोऽनिवार्यात्वं सिद्ध्यति । उक्तं च-

**"कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।**
**लोकसंग्रहमेवापि संपश्यनर्तुमर्हसि ।।"**(12)

किञ्च कीदृशानि कर्माणि जीवने कदापि न परिहार्य अवश्यम् आचरणीयाः एव । इत्यापि विषयः कर्मयोगिना श्रीकृष्णेन सम्यगुपदिश्यतेथा -

**"यज्ञदानतपः कर्म, न त्याज्यं कार्यमेवतत् ।**
**यज्ञोदानं तपश्चैव, पावनानि मनीषिणाम् ।।"**(13) इति ।

महायोगी दिव्यमानवोऽपि श्रीकृष्णः कर्मणो महत्त्वं प्रतिपादयन्नाह यद्यद्यहं न कर्म कुर्यातर्हि लोके मानवाः माम् आदर्शीकृत्वा मदीय मार्गमनुसृत्य कर्मशून्याः भवेयुः । सत्कर्मानुष्ठानलोपेन समस्त प्रजानां दुर्गतेरपि कारकः भवेदहमिति सत्मर्काचरणस्य आवश्यकतामुद्घोषयत्यथा-

**"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।**
**उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्**
**सङ्करस्य च कर्तास्यामुपहन्यामिहः प्रजाः ॥"** (14) इति ।

अतः सर्वस्यापि जनस्य कर्तव्यं यत् निष्कामकर्मणि प्रवर्तेत । मुमुक्षुभिरपि कृतमेतत् ।

**"न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा**
**इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ।**
**एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः**
**कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ||"** (15) इति ।

यः कर्म - विकर्म - अकर्माणां तत्त्वं सम्यक् ज्ञात्वा अनासक्तस्सन् कर्मकुर्वन् अकर्तेव सदा दुःखविमुक्तस्सन् मोक्षभाक च भवति ।

**"त्यक्त्वा कर्म फलसङ्गं नित्यतृप्तो निराश्रयः ।**
**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ||"** (16) इति ।

एवं निष्काममार्गे चरित्व अन्ते सर्वसङ्कल्पमूलान् कामान् परित्यजति स एव योगी -

**"यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।**
**न सन्न्यस्तसङ्कल्पो योगी भवति कश्चन ।।"** (17) इति ।

प्रवृत्ति - निवृत्ति मार्गयोः कतर : पन्थाः साधीयानिति जिज्ञासायां श्रीकृष्णः स्वमतमुपस्थापयति यद् निवृत्तिमार्गाद् प्रवृत्तिमार्गः श्रेयानिति ।

**"संन्यासः कर्मयोगश्च निश्श्रेयसकरा वुभौ ।**
**तयोस्तु कर्मसन्यासात्कर्मयोगो विशिष्यते ।।"** (18) इति ।

## उपसंहारः

एवं सिद्ध्यतितरां यत् कर्मयोग एव साधीयान् सुकरः सुखावाप्तिसाधकश्चेति । स्वकर्तव्ये विमूढः अर्जुनस्य दिवकर्मोपदेशेन सम्यक् दिशानिर्देशं कृत्वा -

**'कर्तव्यं कर्तव्यमेव प्राणैः कण्ठगतैरपि ।**
**अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ।।'**

इत्यार्योक्तेः अक्षरदर्पणमिव कर्ममार्गमुपदिशति योगिपुङ्गवः श्रीकृष्णः । कर्मयोगिनः श्रीकृष्णस्य उपदेशामृतं न केवलं अर्जुनाय अपि च सार्वकालिकः - सार्वत्रिकः - सार्वजनीनश्च विराजते । तस्य आदर्शकर्ममार्गमनुसृत्य वयं सर्वे कर्मरताः – धर्मरताः - ज्ञानरताः भूत्वा अस्यां भारतभूम्यां प्राप्तं जन्मसाफल्यं विधातुं निरन्तरम् अग्रेसरामः ।

## सन्दर्भसङ्केताः


1. आदिशङ्कराचार्यः - विवेकचूडामणिः - श्लोः 2
2. श्रीविष्णुपुराणम् - II/3 - श्लोः 24
3. श्रीमद्भगवद्गीता - मोक्षसन्यासयोगः श्लोः 45
4. श्रीमद्भगवद्गीता - सांख्ययोगः - श्लोः 47
5. ईशावास्योपनिषत् - मंः 2
6. श्रीमद्भगवद्गीता - सांख्ययोगः - श्लोः 37
7. श्रीमद्भगवद्गीता - सांख्ययोगः - श्लोः 48
8. श्रीमद्भगवद्गीता - सांख्ययोगः - श्लोः 50

9. श्रीमद्भगवद्गीता - कर्मयोगः - श्लोः 5
10. श्रीमद्भगवद्गीता - कर्मयोगः - श्लोः 8
11. श्रीमद्भगवद्गीता - कर्मयोगः श्लोः 19
12. श्रीमद्भगवद्गीता - कर्मयोगः - श्लोः 20
13. श्रीमद्भगवद्गीता - मोक्षसन्न्यासयोगः - श्लोः 4
14. श्रीमद्भगवद्गीता - कर्मयोगः - श्लोः 21, 24
15. श्रीमद्भगवद्गीता - कर्मयोगः - श्लोः 14, 15
16. श्रीमद्भगवद्गीता - ज्ञानयोगः - श्लोः 20
17. श्रीमद्भगवद्गीता - आत्मसंयमयोगः - श्लोः 2
18. श्रीमद्भगवद्गीता- - कर्मसन्यासयोगःयोगः - श्लोः 2

## उपयुक्त ग्रन्थसूची


1. आदिशङ्कराचार्यः - विवेकचूडामणिः
2. वेदव्यासमहर्षिः - श्रीविष्णुपुराणम्
3. वेदव्यासमहर्षिः - श्रीमद्भगवद्गीता